# Shri Bala Kavacham 2

# શ્રીબાલાકવચમ્ ૨

## Document Information

Text title : Shri Bala Kavacham 2

File name : bAlAkavacham2.itx

Category : devii, dashamahAvidyA, devI, kavacha

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2020

*sanskritdocuments.org*

# શ્રીબાલાકવચમ્ ૨

શ્રીપાર્વત્યુવાચ-
દેવદેવ મહાદેવ શઙ્કર પ્રાણવલ્લભ ।
કવચં શ્રોતુમિચ્છામિ બાલાયા વદ મે પ્રભો ॥ ૧॥

શ્રીમહેશ્વર ઉવાચ-
શ્રીબાલાકવચં દેવિ મહાપ્રાણાધિકં પરમ્ ।
વક્ષ્યામિ સાવધાના ત્વં શ‍ૃણુષ્વાવહિતા પ્રિયે ॥ ૨॥

અરુણકિરણજાલૈઃ રઞ્જિતાશાવકાશા
વિધૃતજપવટીકા પુસ્તકાભીતિહસ્તા ।
ઇતરકરવરાઢ્યા ફુલ્લકહ્લારસંસ્થા
નિવસતુ હૃદિ બાલા નિત્યકલ્યાણશીલા ॥ ૩॥

(ઐં) વાગ્ભવઃ પાતુ શીર્ષે (ક્લીં) કામરાજસ્તથા હૃદિ ।
સૌઃ શક્તિબીજં માં પાતુ નાભૌ ગુહ્યે ચ પાદયોઃ ॥ ૪॥

ઐં ક્લીં સૌઃ વદને પાતુ બાલા માં સર્વસિદ્ધયે ।
હસકલહ્રીં સૌઃ પાતુ સ્કન્ધે ભૈરવી કણ્ઠદેશતઃ ॥ ૫॥

સુન્દરી નાભિદેશેઽવ્યાચ્ચર્ચે કામકલા સદા ।
ભ્રૂનાસયોરન્તરાલે મહાત્રિપુરસુન્દરી ॥ ૬॥

લલાટે સુભગા પાતુ ભગા માં કણ્ઠદેશતઃ ।
ભગોદયા તુ હૃદયે ઉદરે ભગસર્પિણી ॥ ૭॥

ભગમાલા નાભિદેશે લિઙ્ગે પાતુ મનોભવા ।
ગુહ્યે પાતુ મહાવીરા રાજરાજેશ્વરી શિવા ॥ ૮॥

ચૈતન્યરૂપિણી પાતુ પાદયોર્જગદમ્બિકા ।
નારાયણી સર્વગાત્રે સર્વકાર્યશુભઙ્કરી ॥ ૯॥

બ્રહ્માણી પાતુ માં પૂર્વે દક્ષિણે વૈષ્ણવી તથા ।
પશ્ચિમે પાતુ વારાહી હ્યુત્તરે તુ મહેશ્વરી ॥ ૧૦॥

આગ્નેય્યાં પાતુ કૌમારી મહાલક્ષ્મીશ્ચ નૈરૃતે ।
વાયવ્યે પાતુ ચામુણ્ડા ચેન્દ્રાણી પાતુ ચેશકે ॥ ૧૧॥

જલે પાતુ મહામાયા પૃથિવ્યાં સર્વમઙ્ગલા ।
સ્ક્લીં માં સર્વતઃ પાતુ સકલહ્રીં પાતુ સન્ધિષુ ॥ ૧૨॥

જલે સ્થલે તથાઽઽકાશે દિક્ષુ રાજગૃહે તથા ।
ક્ષૂં ક્ષેં માં ત્વરિતા પાતુ સહ્રીં સક્લીં મનોભવા ॥ ૧૩॥

હંસઃ પાયાન્મહાદેવી પરં નિષ્કલદેવતા ।
વિજયા મઙ્ગલા દૂતી કલ્યાણી ભગમાલિની ।
જલામાલિનિનિત્યા ચ સર્વદા પાતુ માં શિવા ॥ ૧૪॥

ઇત્યેતત્કવચં દેવિ બાલાદેવ્યાઃ પ્રકીર્તિતમ્ ।
સર્વસ્વં મે તવ પ્રીત્યા પ્રાણવદ્રક્ષિતં કુરુ ॥ ૧૫॥

(શ્રીરુદ્રયામલે)

(૧. આકાશે પાતુ વરદા સર્વતો ભુવનેશ્વરી ॥ ૧॥

ઇદં તુ કવચં નામ દેવાનામપિ દુર્લભમ્ ।
પઠેત્પ્રાતઃ સમુત્થાય શુચિઃ પ્રયતમાનસઃ ॥ ૨॥

નામયો વ્યાધપસ્તસ્ય ન ભયં ચ ક્વચિદ્ભવેત્ ।
ન ચ મારીભયં તસ્ય પાતકાનાં ભયં તથા ॥ ૩॥

ગચ્છેચ્છિવપુરં દેવિ સત્યં સત્યં વદામ્યહમ્ ॥ ૪॥

યદિદં કવચં જ્ઞાત્વા શ્રીબાલાં યો જપેચ્છિવે ।
સ પ્રાપ્નોતિ ફલં સર્વં શિવસાયુજ્યસમ્ભવમ્ ॥ ૫॥ ઇતિ પાઠઃ)

ઇતિ શ્રીબાલાકવચં (૨) સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shri Bala Kavacham 2*

pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*